इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क :- 14.10.2024 सायं - 06:20

मुख्यवार्ताः

- राष्ट्रपतिः द्रौपदीमुर्मुः अल्जीरियादेशीयेन राष्ट्रपतिना अब्देलमजीद-तबून इत्यनेन साकं च द्विपक्षीयोपवेशनानि विधास्यति।
- केन्द्रीय-सञ्चारमन्त्री ज्योतिरादित्य-सिन्धियाः अकथयत् यत् 5जी इत्येतस्य पञ्चम-सन्ततेः पदक्षेपेण चत्वारिंशदधिक- द्विसहस्रतमवर्षं यावत् भारतीयार्थव्यवस्थायां सार्धचतुश्शत -मिलियन-अमरीकीयडॉलरमितस्य निवेशस्य आशा दरीदृश्यते।
- संवर्धमानस्य प्रदूषणस्य आलोके दिल्ली-प्रशासनेन राष्ट्रीय-राजधान्यां दिल्ल्यां सर्वप्रकारकेषु स्फोटकेषु पूर्ण-प्रतिबन्धः प्रख्यापितः।
- अमरीकादेशः इजराइलदेशाय उन्नत-प्रक्षेपास्त्र-रक्षा-प्रणालीं प्रेषयिष्यति।
- भारतम् आगामिवर्षे आई.एस.एस.एफ. इत्याख्यस्य कनिष्ठ-विश्व-चषक-लक्ष्यभेदकस्य आतिथ्यं करिष्यति।

अथ वार्ताः विस्तरेण

राष्ट्रपतेः यात्रा

अल्जीरियादेशस्य यात्रायाः द्वितीये दिवसे राष्ट्रपतिः द्रौपदीमुर्मुः अल्जीरिया देशीयेन राष्ट्रपतिना अब्देलमजीद-तबून-इत्यनेन प्रमुखैः नेतृभिस्साकं च द्विपक्षीयोपवेशनानि विधास्यति। अपि च अल्जीरिया-भारत-आर्थिक-मञ्चं सम्बोधयिष्यति। अवधेयं वर्तते यत् राष्ट्रपतिः अल्जीरिया-मॉरिटेनिया- मलावी-देशानां यात्रायाः प्रथमे चरणे अल्जीरियादेशस्य राजधान्यां अस्ति। राष्ट्रपतेः इयं यात्रा अफ्रीकीदेशैः सह भारतस्य सम्बन्धान् प्रबलीकर्तुं केन्द्रिता वर्तते। अस्माकं वार्ताहरेण सूचितं यत् राष्ट्रपतिः अद्य अल्जीरिया-यात्रायाः द्वितीये दिवसे अल्जीरिया-स्वतन्त्रता-सङ्ग्रामस्य वीरयोद्धृणां स्मरणे निर्मितस्य वीरगति-स्मारकस्य मकाम-इचाहिद-इत्याख्यस्य भ्रमणं कृत्वा हुतिंगतेभ्यः वीरेभ्यः पुष्पाञ्जलिं समर्पितवती।

सिंधिया- वैश्विकसङ्गोष्ठी

केन्द्रीयसञ्चारमन्त्री ज्योतिरादित्य-सिन्धियाः अद्य प्रावोचत् यत् भारतेन केवलं द्वाविंशतिः मासेषु सर्वेषु राज्येषु केन्द्रशासितप्रदेशेषु च अशीतिः प्रतिशतं यावत् जनसङ्ख्यां स्पृष्टवा 5जी इति पञ्चमसन्ततेः दूरसञ्चार-सेवाः समारब्धाः। नवदिल्ल्यां 5जी इत्येतस्य वैश्विक - मानक-सङ्गोष्ठ्याः औद्घाटनिके सत्रे श्रीसिन्धियाः अकथयत् यत् अमुना 5जी इत्येतस्य पदक्षेपेण चत्वारिंशदधिक- द्विसहस्रतमवर्षं यावत् भारतीय-अर्थव्यवस्थायां सार्धचतुश्शत - मिलियन-अमरीकीयडॉलरमितस्य निवेशस्य आशा दरीदृश्यते। वैश्विकसङ्गोष्ठ्याः विषये प्रवदन् मन्त्री अवोचत् यत् संगोष्ठी एषा वैश्विक-संवादाय प्रकाशस्तम्भत्वेनापि कार्यं समाचरति। मन्त्रिणा अग्रे निगदितं यत् समग्रविश्वं प्रौद्योगिक-नवाचारयोः आदर्शात्मकं परिवर्तनम् अवलोकयति। एतदर्थं मानकानां विनियमानाम् अवधारणा अधिकं महत्त्वपूर्णमस्ति। प्रथमवारमपि विश्व-दूरसञ्चार-मानकीकरण-सभा भारते आयोज्यते। एतस्मिन् कार्यक्रमे शताधिकं देशाः सम्मिलिताः भवन्ति। अत्रावसरे, अन्ताराष्ट्रिय-दूरसञ्चार-सङ्घस्य महासचिवः डोरीन-बोग्डन-मार्टिन-इत्येषः ख्यापितवान् यत् भारत देशः तेभ्यः अनेकेभ्यः देशेभ्यः आदर्शस्वरूपो विद्यते ये प्राविधिक-परिवर्तनम् अन्विष्यन्ति। असौ भारते प्रारब्ध-कृत्रिमबुद्धिमत्तायाः महत्त्वपूर्ण-निवेशम् अभिलक्ष्य प्रसन्नताम् अभिव्यक्तवान्।

## दिल्ली-स्फोटक- प्रतिबंध

संवर्धमानस्य प्रदूषणस्य आलोके दिल्ली-सर्वकारेण राष्ट्रीय-राजधान्यां दिल्ल्यां सर्वप्रकारकाणां स्फोटकाणां निर्माणे-संभरणे-विक्रये च पूर्ण-प्रतिबंधः आरोपितः। प्रतिबंधोऽयम् अद्यतः अग्रिम-वर्षस्य जनवरी-मासस्य प्रथम-दिनांक-पर्यन्तं आरोपितो भविष्यति। अस्मिन् संदर्भे दिल्ली-प्रदूषण-नियंत्रण-आयोगेन आदेशः सम्प्रसारितः यस्मिन् सर्वप्रकारकाणां स्फोटकानां प्रज्वलने अन्तर्जालीय-माध्यमेन विभिन्नेषु पटलेषु आपूर्ति-कार्ये अपि प्रतिबंधः सम्मिलितः अस्ति।

## विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## प्रधानमन्त्री-विश्वसञ्चारः

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याम् अन्ताराष्ट्रिय-दूरसञ्चार-सङ्घस्य विश्व-दूरसञ्चार-मानकीकरण-सभायाः उद्घाटनं करिष्यति। भारतं प्रथमवारं अस्याः सभायाः आयोजनं करोतीति। श्रीमोदी अत्रावसरे इण्डिया-मोबाइल-काङ्ग्रेस-इत्यस्यापि उद्घाटनं करिष्यति। अस्माकं वार्ताहरः सूचितवान् यत् दशदिवसात्मके एतस्मिन् कार्यक्रमे प्रवर्तमान-भविष्यकालयोः उपयुज्यमानस्याः प्राद्योगिक्याः विषयेऽपि विचार-विमर्शो भविष्यति।

-

जयशङ्करः-ई-माइग्रेट इति

विदेशमन्त्री डॉ सुब्रह्मण्यम जयशङ्करः अद्य नवदिल्ल्यां ई-माइग्रेट वी इत्यस्य आन्तर्जालिक पटलस्य द्वितीयसंस्करणस्य चलदूरभाषीय- अनुप्रयोगस्य चापि उद्घाटनं कृतवान्। एतस्मिन् आन्तर्जालिक-पटले एकाशीतिसहस्राधिक-द्वि-लक्षं यावत् पञ्जीकृताः वैदेशिक-नियोक्तारः निहिताः सन्ति। इदम् अन्तर्जालपटलं प्रवासिभारतीयेभ्यः सुरक्षितं वैधनियुक्तमार्गं च संवर्धयति इति। स्वकीये सम्बोधने डॉ जयशङ्करः कथितवान् यत् ई-माइग्रेट वी-इत्येतस्य द्वितीयसंस्करणस्य शुभारम्भः भारतीयेभ्यः सुरक्षित-पारदर्शि-समावेशि-गतिशीलतानां सृजनात्मक-उपक्रमाय प्रशासनस्य प्रयासानाम् उद्धरणमस्ति। अपि च इदं नवीनसंस्करणं विदेशेषु भारतीय-कर्मकराणाम् अधिकारसम्मानयोः रक्षां प्रति प्रशासनस्य वचनबद्धतामपि प्रदर्शयति। अस्य पटलस्य दक्षतां समेधितुं प्रौद्योगिक्याः प्रयोगः अपि जातः। प्रवासिभ्यश्च सामाजिक-सुरक्षामपि प्रदास्यते।

जोशी-विश्वमानककार्य क्रमः

उपभोक्तृ-विषयक-मन्त्री प्रह्लादजोशी अद्य प्रतिपादितवान् यत् व्यतीतेषु दशसु वर्षेषु भारतीय-मानक-विभाग-द्वारा प्रायशः द्वात्रिंशदुत्तर-सप्तशतम् उत्पादेभ्यः भूयोऽपि सार्धैकशतं गुणवत्ता-नियन्त्रणादेशाः अभिसूचिताः। नवदिल्ल्यां विश्व-मानक-दिवस-कार्यक्रमावसरे असौ न्यगादीत् यत् राष्ट्रीय-मानकानां कार्यान्वयनाय प्रशासनेन सर्वोच्च-प्राथमिकता प्रदीयते। वार्ताहरैः समं वार्तां कुर्वन् असौ उपभोक्तृभिः आग्रहं कृतवान् यत्तैः बीआई.एस्. इत्यनेन चिह्नेन समङ्कितानाम् उत्पादानाममेव उपयोगः करणीयः इति।

BYTE – PRAHLAD JOSHI – 17 SEC.

जम्मू-कश्मीर-राष्ट्रपति शासन

केन्द्रप्रशासनेन केन्द्रशासित-प्रदेशे जम्मूकश्मीरे राष्ट्रपति-शासनं प्रत्यवगृहितम् । अनेन कार्येण जम्मूकश्मीरे नवीन-सर्वकारस्य निर्माणस्य मार्गःप्रशस्तो जातः। अस्मिन् सन्दर्भे केन्द्रीय सर्वकारेण प्रख्यापिता एका आधिकारिकी अधिसूचना। सद्यः सम्पन्ने विधानसभा-निर्वाचने नेशनल-कांफ्रेस-कांग्रेस दलयोः संयुत्या बहुमतं समर्जितम्। इतः पूर्वं शुक्रवासरे नेशनल कांफ्रेन्स दलस्य उपाध्यक्षः ओमार-अब्दुल्लाः श्रीनगरस्थे राजभवने उपराज्यपालं मनोज सिन्हां मिलित्वा जम्मूकश्मीरे सर्वकास्य निर्माणाय स्वसंकल्पं ज्ञापितवान्।

## यू.एस.- थाड

संयुक्त-राज्य-अमेरिका-देशेन घोषितम् यत् सः थाड-इति स्वदेशीय-प्रक्षेपास्त्र-संरक्षा प्रणालीं अथ च शतसंख्यकान् सैन्यभटान् च इजराइल देशाय प्रदास्यति। गतवर्षे इजराइल-देशे संजातस्य हमास-आतंकीय-संघटनस्य आक्रमणान्तरं प्रथमावसरोऽयम् यत् संयुक्त-राज्य-अमेरिकायाः सैन्यभटाः इजराइल-देशे-नियुक्ताः भवन्ति।

## भारतम् - ISSF

भारतम् आगामि वर्षे आई.एस.एस.एफ इत्याख्यस्य कनिष्ठ-विश्व-चषक-लक्ष्यभेदकस्य आतिथ्यं।

।।इति वार्ता:।।